.. 17. mahAprasthAnikaparva Kumbhaghonam Edition ..

॥ १७. महाप्रस्थानिकपर्व ॥

महाप्रस्थानिकपर्व - अध्याय ००१
॥ श्रीः ॥
१७.१. अध्यायः १

Mahabharata - Mahaprasthanika Parva - Chapter Topics
भ्रातृभिर्द्रौपद्या च सह स्वर्गे जिगमिषुणा युधिष्ठिरेण युयुत्सौ
राज्यभारनिवेशनपूर्वकं परिक्षितो राज्येऽभिषेचनम् ॥ १ ॥
तथा कृच्छ्रात्पौरानुमतिसंपादनेन वल्कलधारणादिपूर्वकं शुना
सह गृहात्प्रस्थानम् ॥ २ ॥
अर्जुनेन मध्येमार्गमग्निवचसा सनिषङ्गस्य गाण्डीवस्य वरुणोद्देशेन
समुद्रे प्रक्षेपणम् ॥ ३ ॥

Mahabharata - Mahaprasthanika Parva - Chapter Text

श्रीवेदव्यासाय नमः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १७-१-१ (९८३१६)
जनमेजय उवाच। १७-१-१क्ष् (८०७५)
एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १७-१-१ (९८३१७)
वैशम्पायन उवाच। १७-१-२क्ष् (८०७६)
श्रुत्वैवं कौरवो राजा वृष्णीनां कदनं महत् ।
प्रस्थाने मतिमाधाय वाक्यमर्जुनमब्रवीत् ॥ १७-१-२ (९८३१८)
कालः पचति भतानि सर्वाण्येव महामते ।
कालपाशमहं मन्ये त्वमपि द्रष्टुमर्हसि ॥ १७-१-३ (९८३१९)
इत्युक्तः स तु कौन्तेयः कालः काल इति ब्रुवन् ।
अन्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य धीमतः ॥ १७-१-४ (९८३२०)
अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा ।
अन्वपद्यन्त तद्वाक्यं यदुक्तं सव्यसाचिना ॥ १७-१-५ (९८३२१)
ततो युयुत्सुमानाय्य प्रव्रजन्धर्मकाम्यया ।

राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः ॥१७-१-६ (९८३२२)
अभिषिच्य स्वराज्ये च राजानं च परिक्षितम् ।
दुःखार्तश्चाब्रवीद्राजा सुभद्रां पाण्डवाग्रजः ॥१७-१-७ (९८३२३)
एष पुत्रस्य पुत्रस्ते कुरुराजो भविष्यति ।
यदूनां परिशेषश्च वज्रो राजा कृतश्च ह ॥१७-१-८ (९८३२४)
परिक्षिद्धास्तिनपुरे शक्रप्रस्थे च यादवः ।
वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः ॥१७-१-९ (९८३२५)
इत्युक्त्वा धर्मराजाः स वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामदीनां तथैव च ॥१७-१-१० (९८३२६)
भ्रातृभिः सह धर्मात्मा कृत्वोदकमतन्द्रितः ।
श्राद्धान्यद्दिश्य सर्वेषां चकार विदिवत्तदा ॥१७-१-११ (९८३२७)
द्वैपायनं नारदं च मार्कण्डेयं तपोधनम् ।
भारद्वाजं याज्ञवल्क्यं हरिमुद्दिश्य यत्नवान् ।
अभोजयत्स्वादु भोज्यं कीर्तयित्वा च शार्ङ्गिणं ॥ १७-१-१२ (९८३२८)
ददौ रत्नानि वासांसि ग्रामानश्वान्रथांस्तथा ।
स्त्रियश्च द्विजमुख्येभ्यस्तदा शतसहस्रशः ॥१७-१-१३ (९८३२९)
कृपमभ्यर्च्य च गुरुमथ पौरपुरस्कृतम् ।
ॽआहूय भरतश्रेष्ठ संनिवेश्यासने तदा।’
शिष्यं परिक्षितं तस्मै तदौ भरतसत्तमः ॥ १७-१-१४ (९८३३०)
ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः ।
सर्वमाचष्ट राजर्षिकीर्षितमथात्मनः ॥१७-१-१५ (९८३३१)
ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः ।
भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः ॥१७-१-१६ (९८३३२)
नैवं कर्तव्यमिति ते तदोचुस्तं जनाधिपम् ।
न च राजा तथाऽकार्षीत्कालपर्यायधर्मवित् ॥१७-१-१७ (९८३३३)
ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् ।
गमनाय मतिं चक्रे कृष्णस्य गमनादपि ॥१७-१-१८ (९८३३४)
ॽवर्तमाने विवादे तु वास्तुविक्रयिणं प्रति ।
धनेच्छा युगपत्प्राप्ता क्षेत्रतस्वामिभूभृताम् ॥१७-१-१९ (९८३३५)
प्राप्तं कलियुगं ज्ञात्वा सहदेवो हसन्निव ।
राज्ञस्तु कथयामास धर्मो नष्टस्तु सङ्करः ॥१७-१-२० (९८३३६)
श्रुत्वा तु दुर्मना राजा पर्याप्तं जीवनं मम।’
इति स्म राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः ।
उत्सृज्याभरणान्यङ्गाज्जगृहे वल्कलान्युत ॥ १७-१-२१ (९८३३७)
भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी ।
तथैव जगृहुः सर्वे वल्कलानि नराधिप ॥१७-१-२२ (९८३३८)

विधिवत्कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ ।
समुत्सृज्याप्सु सर्वेऽग्नीन्प्रतस्थुर्नरपुङ्गवाः ॥१७-१-२३ (९८३३९)
ततः प्ररुरुदुः सर्वाः स्त्रियो दृष्ट्वा नरोत्तमान् ।
प्रस्थितान्द्रौपदीषष्ठान्पुरा द्यूतजितान्यथा ॥१७-१-२४ (९८३४०)
हर्षोऽभवच्च सर्वेषां भ्रातॄणां गमनं प्रति ।
युधिष्ठिरमतं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च। १७-१-२५ (९८३४१)
भ्रातरः पञ्च कृष्णा च षष्ठी श्वा चैव सप्तमः ।
आत्मना सप्तमो राजा निर्ययौ गजसाह्वयात् ।
पौरैरनुगतो दूरं सर्वैरन्तःपुरैस्तथा ॥ १७-१-२६ (९८३४२)
न चैनमशकत्कश्चिन्निवर्तस्वेति भाषितुम् ।
न्यवर्तन्त ततः सर्वे नरा नगरवासिनः ॥१७-१-२७ (९८३४३)
कृपप्रभृतयश्चैव युयुत्सुं पर्यवारयन् ।
विवेश गङ्गां कौरव्य उलूपी भुजगात्मजा ॥१७-१-२८ (९८३४४)
चित्राङ्गदा ययौ चापि मणलूरपुरं प्रति ।
शिष्टाः परिक्षितं त्वन्या मातरः पर्यवारयन् ॥१७-१-२९ (९८३४५)
पाण्डवाश्च महात्मानो द्रौपदी च यशस्विनी ।
कृतोपवासाः कौरव्य प्रययुः प्राङ्मुखास्ततः ॥१७-१-३० (९८३४६)
योगयुक्ता महात्मानस्त्यागधर्ममुपेयुषः ।
अभिजग्मुर्बहून्देसान्सरितः सागरांस्तथा ॥१७-१-३१ (९८३४७)
युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् ।
अर्जुनस्तस्य चान्वेव यमौ चापि यथाक्रमम ॥१७-१-३२ (९८३४८)
पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा ।
द्रौपदी योषितांश्रेष्ठा ययौ भरतसत्तम। १७-१-३३ (९८३४९)
श्वा चैवानुययावेकः प्रस्थितान्पाण्डवान्वनम् ।
क्रमेणि ते ययुर्वीरा लौहित्यं सलिलार्णवम् ॥१७-१-३४ (९८३५०)
गाण्डीवं तु धनुर्दिव्यं न मुमोच धनंजयः ।
रत्नलोभान्महाराज ते चाक्षय्ये महेषुधी ॥१७-१-३५ (९८३५१)
अग्निं ते ददृशुस्तत्र स्थितं शैलमिवाग्रतः ।
मार्गमावृत्य तिष्ठन्तं साक्षात्पुरुषविग्रहम् ॥१७-१-३६ (९८३५२)
ततो देवः स सप्तार्चिः पाण्डवानिदमब्रवीत् ।
भोभो पाण्डुसुता वीराः पावकं मां निबोधत ॥१७-१-३७ (९८३५३)
युधिष्ठिर महाबाहो भीमसेन परंतप ।
अर्जुनाश्विसुतौ वीरौ निबोधत वचो मम ॥१७-१-३८ (९८३५४)
अहमग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम् ।
अर्जुनस्य प्रभावेन तथा नारायणस्य च ॥१७-१-३९ (९८३५५)
अयं वः फल्गुनो भ्राता गाण्डीवं परमायुधम् ।

परित्यज्य वने यातु नानेनार्थोस्ति कश्चन ॥ १७-१-४० (९८३५६)
चक्ररत्नं तु यत्कृष्णे स्थितमासीन्महात्मनि ।
गतं तच्च पुनर्हस्ते कालेनैष्यति तस्य ह ॥ १७-१-४१ (९८३५७)
वरुणादाहृतं पूर्वं मयैतत्पार्थकारणात् ।
गाण्डीवं धनुषां श्रेष्ठं वरुणायैव दीयताम् ॥ १७-१-४२ (९८३५८)
ततस्ते भ्रातरः सर्वे धनंजयमचोदयन् ।
स जले प्राक्षिपच्चैतत्तथाऽक्षय्ये महेषुधी ॥ १७-१-४३ (९८३५९)
ततोऽग्निर्भरतश्रेष्ठ तत्रैवान्तरधीयत ।
ययुस्च पाण्डवा वीरास्ततस्ते दक्षिणामुखाः ॥ १७-१-४४ (९८३६०)
ततस्ते तूत्तरेणैव तीरेण लवणांभसः ।
जग्मुर्भरतशार्दूल दिशं दक्षिणपश्चिमाम् ॥ १७-१-४५ (९८३६१)
ततः पुनः समावृत्ताः पश्चिमां दिशमेव ते ।
ददृशुर्द्वारकां चापि सागरेण परिप्लुताम् ॥ १७-१-४६ (९८३६२)
उदीचीं पुनरावृत्त्य ययुर्भरतसत्तमाः ।
प्रादक्षिण्यं चिकीर्षन्तः पृथिव्या योगधर्मिणः ॥ ॥ १७-१-४७ (९८३६३)

इति श्रीमन्महाभारते महाप्रस्थानिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

Mahabharata - Mahaprasthanika Parva - Chapter Footnotes

७-१-२ प्रस्थाने स्वर्गं गन्तुं गृहान्निःसरणे ॥
७-१-३ पाशं तत्कृतमाकर्षं मरणमितियावत् । तदहं मन्ये अङ्गीकरोमि। त्वमप्येतद्द्रष्टुमालोचितुम् ॥
७-१-५ कालः काल इति नित्यार्थे द्वित्वम् । अपरिहार्यः कालो मृत्युः सोऽद्यैवास्तु किं चिरेणेत्याशयः ॥
७-१-६ धर्मकाम्यया प्रवजन्नतूद्वेगेन । परिददौ तदधीनं कृतवान्। तस्याभिषेकेऽनधिकारात् ॥
७-१-७ स्वराज्ये हास्तिनपुरे ॥
७-१-९ अधर्मे परिक्षिद्वज्रयोर्बालयोररक्षणजे । महाप्रस्थानमियं मा कुर्यादिति भावः ॥
७-१-१३ स्त्रियो दासीः ॥
७-१-१८ अनुमान्यानुमतिप्रदं कृत्वा ॥
७-१-२३ नैष्ठिकीं पार्यन्तिकीं उत्सर्गेष्टिमित्यर्थः । आत्मन्यग्नीन्समारोप्याप्स्वग्नीनुत्सृज्येति ज्ञेयम् ॥
७-१-२९ अन्या युधिष्ठिरादीनां भार्याः श्रउतसोमादीनां मातरः ॥
७-१-३४ लौहित्यं उदयाचलप्रान्तस्थं समुद्रम ॥
७-१-४० अनेन गाण्डीवेन । अर्थः प्रयोजनम् ॥

७-१-४१ कालेन अवतारान्तरे ॥

महाप्रस्थानिकपर्व - अध्याय ००२
॥ श्रीः ॥
१७.२. अध्यायः २

Mahabharata - Mahaprasthanika Parva - Chapter Topics
मेरुगिरिंप्रति गच्छन्तं युधिष्ठिरं ज्येष्ठ्यक्रमादनुगच्छत्सु दौपद्यादिषु योगभ्रंशात्क्रमेण भूमौ निपतत्सु भीमप्रश्नात्तं प्रति युधिष्ठिरेण तेषां पतने हेतुकथनम् ॥ १ ॥
तथा ततः शुना केवलमनुगम्यमानेन सता पुरोगमनम् ॥ २ ॥

Mahabharata - Mahaprasthanika Parva - Chapter Text

वैशम्पायन उवाच ।
ततस्ते नियतात्मान उदीचीं दिशमास्थिताः ।
ददृशुर्योगयुक्ताश्च हिमवन्तं महागिरिम् ॥ १७-२-१ (९८३६४)
तं चाप्यतिक्रमन्तस्ते ददृशुर्वालुकार्णवम् ।
अवैक्षन्त महाशैलं मेरुं शिखरिणां वरम् ॥ १७-२-२ (९८३६५)
तेषां तु गच्छतां शीघ्रं सर्वेषां योगधार्मिणाम् ।
याज्ञसेनी भ्रष्टयोगा निपपात महीतले ॥ १७-२-३ (९८३६६)
तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः ।
उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ह ॥ १७-२-४ (९८३६७)
नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप ।
कारणं किंनु तद्ब्रूहि यत्कृष्णा पतिता भुवि ॥ १७-२-५ (९८३६८)
युधिष्ठिर उवाच। १७-२-६क्ष् (८०७७)
पक्षपातो महानस्या विशेषेण धनंजये ।
तस्यैतत्फलमद्यैषा भुङ्क्ते पुरुषसत्तम ॥ १७-२-६ (९८३६९)
वैशम्पायन उवाच। १७-२-७क्ष् (८०७८)
एवमुक्त्वाऽनवेक्ष्यैनां ययौ भरतसत्तमः ।
समाधाय मनो धीमान्धर्मात्मा पुरुषर्षभः ॥ १७-२-७ (९८३७०)
सहदेवस्ततो विद्वान्निपपात महीतले ।
तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ॥ १७-२-८ (९८३७१)
योऽयमस्मासु सर्वेषु शुश्रूषुरनहंकृतः ।
सोयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ॥ १७-२-९ (९८३७२)
युधिष्ठिर उवाच। १७-२-१०क्ष् (८०७९)

आत्मनः सदृशं प्राज्ञं नैषोऽमन्यत कञ्चन ।
तेन दोषेण पतितो विद्वानेष नृपात्मजः ॥ १७-२-१० (९८३७३)
वैशम्पायन उवाच। १७-२-११क्ष् (८०८०)
इत्युक्त्वा तं समुत्सृज्य सहदेवं ययौ तदा ।
भ्रातृभिः सह कौन्तेयः शुना चैव युधिष्ठिरः ॥ १७-२-११ (९८३७४)
कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम् ।
आर्तो बन्धुप्रियः शूरो नकुलो निपपात ह ॥ १७-२-१२ (९८३७५)
तस्मिन्निपतिते वीरे नकुले चारुदर्शने ।
पुनरेव तदा भीमो राजानमिदमब्रवीत् ॥ १७-२-१३ (९८३७६)
योऽयमक्षतधर्मात्मा भ्राता वचनकारकः ।
रूपेणाप्रतिमो लोके नकुलः पतितो भुवि ॥ १७-२-१४ (९८३७७)
इत्युक्तो भीमसेनेन प्रत्युवाच युधिष्ठिरः ।
नकुलं प्रति धर्मात्मा सर्वबुद्धिमतांवरः ॥ १७-२-१५ (९८३७८)
रूपेणि मत्समो नास्ति कश्चिदित्यस्य दर्शनम् ।
अधिकश्चाहमेवैक इत्यस्य मनसि स्थितम् ॥ १७-२-१६ (९८३७९)
नकुलः पतितस्तस्मादागच्छ त्वं वृकोदर ।
यस्य यद्विहितं वीर सोऽवश्यं तदुपाश्नुते ॥ १७-२-१७ (९८३८०)
तांस्तु प्रपतितान्दृष्ट्वा पाण्डवः श्वेतवाहनः ।
पपात शोकसंतप्तस्ततोनु परवीरहा ॥ १७-२-१८ (९८३८१)
तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रतेजसि ।
म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् ॥ १७-२-१९ (९८३८२)
अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्मनः ।
अथ कस्य विकारोऽयं येनायं पतितो भुवि ॥ १७-२-२० (९८३८३)
युधिष्ठिर उवाच। १७-२-२१क्ष् (८०८१)
एकोहं निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् ।
न च तत्कृतवानेष शूरमानी ततोपतत् ॥ १७-२-२१ (९८३८४)
अवमेने धनुर्ग्राहानेष सर्वांश्च फल्गुनः ।
तथा चैतन्न तु तथा कर्तव्यं भूतिमिच्छता ॥ १७-२-२२ (९८३८५)
वैशम्पायन उवाच। १७-२-२३क्ष् (८०८२)
इत्युक्त्वा प्रस्थितो राजा भीमोथ निपपात ह ।
पतितश्चाब्रवीद्भीमो धर्मराजं युधिष्ठिरम् ॥ १७-२-२३ (९८३८६)
भोभो राजन्नवेक्षस्व पतितोहं प्रियस्तव ।
किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह ॥ १७-२-२४ (९८३८७)
युधिष्ठिर उवाच। १७-२-२५क्ष् (८०८३)
अतिभुक्तं च भवता प्राणेन च विकत्थसे ।
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ ॥ १७-२-२५ (९८३८८)

इत्युक्त्वा तं महाबाहुर्जगामानवलोकयन् ।
श्वाप्येकोनुययौ यस्ते बहुशः कीर्तितो मया ॥ ॥ १७-२-२६ (९८३८९)

इति श्रीमन्महाभारते महाप्रस्थानिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

Mahabharata - Mahaprasthanika Parva - Chapter Footnotes

७-२-१ ततो दिक्त्रयप्रदक्षिणीकरणानन्तरम् । योगयुक्ताः समाहितमनसः ॥
७-२-३ भ्रष्टयोगा ध्यानात् स्खलितमानसा ॥
७-२-७ अनवेक्ष्य स्वर्गान्तरायरूपः स्नेहो माभूदिति भावः ॥

महाप्रस्थानिकपर्व - अध्याय ००३
॥ श्रीः ॥
१७.३. अध्यायः ३

Mahabharata - Mahaprasthanika Parva - Chapter Topics

शुना सह गच्छन्तं युधिष्ठिरं प्रति इन्द्रेण स्वर्गगमनाय निजरतारोहणचोदना ॥ १ ॥
युधिष्ठिरे शुना विना रथारोहणमरोचयमाने यमेन निजस्वरूपप्रकाशनेन तत्प्रशंसनम् ॥ २ ॥
ततो यमेन्द्रादिभी रथेन स्वर्गं प्रापितेन युधिष्ठिरेण तत्र भीमाद्यदर्शनादिन्द्रंप्रति भ्रात्रादीन्विना स्वस्य स्वर्गेप्यनभिरुचिकथनपूर्वकं तत्समीपगमनेच्छानिवेदनम् ॥ ३ ॥

Mahabharata - Mahaprasthanika Parva - Chapter Text

वैशम्पायन उवाच ।
ततः सन्नादयञ्शक्रो दिवं भूमिं च सर्वशः ।
रथेनोपययौ पार्थमारोहेत्यब्रवीच्च तम् ॥ १७-३-१ (९८३९०)
स्वभ्रातॄन्पतितान्दृष्ट्वा धर्मराजो युधिष्ठिरः ।
अब्रवीच्छोकसंतप्तः सहस्राक्षमिदं वचः ॥ १७-३-२ (९८३९१)
भ्रातरः पतिता मेऽत्र गच्छेयुस्ते मया सह ।
न विना भ्रातृभिः स्वर्गमिच्छे गन्तुं सुरेश्वर ॥ १७-३-३ (९८३९२)
सुकुमारी सुखार्हा च राजपुत्री पुरंदर ।
साऽस्माभिः सह गच्छेत तद्भवाननुमन्यताम् ॥ १७-३-४ (९८३९३)
शक्र उवाच । १७-३-५क्ष् (८०८४)
भ्रातॄन्द्रक्ष्यसि स्वर्गे त्वमग्रतस्त्रिदिवं गतान् ।

कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ॥१७-३-५ (९८३९४)
निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ ।
अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥१७-३-६ (९८३९५)
युधिष्ठिर उवाच।१७-३-७क्ष् (८०८५)
अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह ।
स गच्छेत मया सार्धमानृशंस्या हि मे मतिः ॥१७-३-७ (९८३९६)
शक्र उवाच।१७-३-८क्ष् (८०८६)
अमर्त्यत्वं मत्समत्वं च राज-
ञ्श्रियं कृत्स्नां महतीं चैव सिद्धिम् ।
संप्राप्तोद्य स्वर्गसुखानि च त्वं
त्यज श्वानं नात्र नृशंसमस्ति ॥ १७-३-८ (९८३९७)
युधिष्ठिर उवाच।१७-३-९क्ष् (८०८७)
अनार्यमार्येणि सहस्रनेत्र
शक्यं कर्तुं दुष्करमेतदार्य ।
मा मे श्रिया सङ्गमनं तयाऽस्तु
यस्याः कृते भक्तजनं त्यजेयम् ॥ १७-३-९ (९८३९८)
इन्द्र उवाच।१७-३-१०क्ष् (८०८८)
स्वर्गे लोके श्ववतां नास्ति धिष्ण्य-
मिष्टापूर्तं क्रोधवशा हरन्ति ।
ततो विचार्यि क्रियतां धर्मराज
त्यज श्वानं नात्र नृशंसमस्ति। १७-३-१० (९८३९९)
युधिष्ठिर उवाच।१७-३-११क्ष् (८०८९)
भक्तत्यागं प्राहुरत्यन्तपापं
तुल्यं लोके ब्रह्मवध्याकृतेन ।
तस्मान्नाहं जातु कथञ्चनाद्य
त्यक्ष्याम्येनं स्वसुखार्थी महेन्द्रः ॥ १७-३-११ (९८४००)
भीतं भक्तं नान्यदस्तीति चार्तं
प्राप्तं क्षीणं रक्षणे प्राणलिप्सुम् ।
प्राणत्यागादप्यहं नैव मोक्तुं
यतेयं वै नित्यमेतद्व्रतं मे ॥ १७-३-१२ (९८४०१)
इन्द्र उवाच।१७-३-१३क्ष् (८०९०)
शुना दृष्टं क्रोधवशा हरन्ति
यद्दत्तमिष्टं विवृतमथो हुतं च ।
तस्माच्छुनस्त्यागमिमं कुरुष्व
शुनस्त्यागात्प्राप्स्यसे देवलोकम् ॥ १७-३-१३ (९८४०२)
त्यक्त्वा भ्रातॄन्दयितां चापि कृष्णां

प्राप्तो लोकः कर्मणा स्वेन वीर ।
श्वानं चैनं न त्यजसे कथं नु
त्यागं कृत्स्नं चास्थितो मुह्यसेऽद्य ॥ १७-३-१४ (१८४०३)
युधिष्ठिर उवाच। १७-३-१५क्ष् (८०९१)
न विद्यते संधिरथापि विग्रहो
मृतैर्मर्त्यैरिति लोकेषु निष्ठा ।
न ते मया जीवयितुं हि शक्या-
स्ततस्त्यागस्तेषु कृतो न जीवताम् ॥ १७-३-१५ (१८४०४)
प्रतिप्रदानं शरणागतस्य
स्त्रिया वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र
भक्तत्यागश्चैव समो मतो मे ॥ १७-३-१६ (१८४०५)
वैशम्पायन उवाच। १७-३-१७क्ष् (८०९२)
तद्धर्मराजस्य वचो निशम्य
धर्मस्वरूपी भगवानुवाच ।
युधिष्ठिरं प्रीतियुक्तो नरेन्द्रं
श्लक्ष्णैर्वाक्यैः संस्तवसंप्रयुक्तैः ॥ १७-३-१७ (१८४०६)
अभिजातोसि राजेन्द्र पितुर्वृत्तेन मेधया ।
अनुक्रोशेनि चानेन सर्वभूतेषु भारत ॥ १७-३-१८ (१८४०७)
पुरा द्वैतवने चासि मया पुत्र परीक्षितः ।
पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः ॥ १७-३-१९ (१८४०८)
भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातरावुभौ ।
मात्रोः साम्यमभीप्सन्वै नकुलं जीवमिच्छसि ॥ १७-३-२० (१८४०९)
अयं श्वा भक्त इत्येवं त्यक्तो देवरथस्त्वया ।
तस्मात्स्वर्गे न ते तुल्यः कश्चिदस्ति नराधिपः ॥ १७-३-२१ (१८४१०)
अतस्तवाक्षया लोकाः स्वशरीरेण भारत ।
प्राप्तोसि भरतश्रेष्ठ दिव्यां गतिमनुत्तमाम् ॥ १७-३-२२ (१८४११)
वैशम्पायन उवाच। १७-३-२३क्ष् (८०९३)
ततो धर्मश्च शक्रश्च मरुतश्चाश्विनावपि ।
देवा देवर्षयश्चैव रथमारोप्य पाण्डवम् ॥ १७-३-२३ (१८४१२)
प्रययुः स्वैर्विमानैस्ते सिद्धाः कामविहारिणः ।
सर्वे विरजसः पुण्याः पुण्यवाग्बुद्धिकर्मिणः ॥ १७-३-२४ (१८४१३)
स तं रथं समास्थाय राजा कुरुकुलोद्वहः ।
ऊर्ध्वमाचक्रमे शीघ्रं तेजसाऽऽवृत्यरोदसी ॥ १७-३-२५ (१८४१४)
ततो देवनिकाय्यस्थो नारदः सर्वलोकवित् ।
उवाचोच्चैस्तदा वाक्यं बृहद्वादी बृहत्तपाः ॥ १७-३-२६ (१८४१५)

येऽपि राजर्षयः पूर्वे ते चापि समुपस्थिताः ।
कीतिं प्रच्छाद्य तेषां वै कुरुराजोऽधितिष्ठति ॥ १७-३-२७ (९८४१६)
लोकानावृत्य यशसा तेजसा वृत्तसंपदा ।
स्वशरीरेण सम्प्राप्तं नान्यं शुश्रम पाण्डवात् ॥ १७-३-२८ (९८४१७)
तेजांसि यानि दृष्टानि भूमिष्ठेन त्वया विभो ।
वेश्मानि भुवि देवानां पश्यामूनि सहस्रशः ॥ १७-३-२९ (९८४१८)
नारदस्य वचः श्रुत्वा राजा वचनमब्रवीत् ।
भ्रातॄनपश्यन्धर्मात्मा स्वपक्षांश्चैव पार्थिवान् ॥ १७-३-३० (९८४१९)
शुभं वा यदि वा पापं भ्रातॄणां स्थानमद्य मे ।
तदेव प्राप्तुमिच्छामि लोकान्यान्न कामये ॥ १७-३-३१ (९८४२०)
राज्ञस्तु वचनं श्रुत्वा देवराजः पुरंदरः ।
आनृशंस्यसमायुक्तं प्रत्युवाच युधिष्ठिरम् ॥ १७-३-३२ (९८४२१)
स्थानेऽस्मिन्वस राजेन्द्र कर्मभिर्निर्जिते शुभैः ।
किं त्वं मानुष्यकं स्नेहमद्यापि परिकर्षसि ॥ १७-३-३३ (९८४२२)
सिद्धिं प्राप्तोसि परमां यता नान्यः पुमान्क्वचित् ।
नैव ते भ्रातरः स्थानं सम्प्राप्ताः कुरुनन्दन ॥ १७-३-३४ (९८४२३)
अद्यापि मानुषो भावः स्पृशते त्वां नराधिप ।
स्वर्गोऽयं पश्य देवर्षीन्सिद्धांश्च त्रिदिवालयान् ॥ १७-३-३५ (९८४२४)
युधिष्ठिरस्तु देवेन्द्रमेवंवादिनमीश्वरम् ।
पुनरेवाब्रवीद्धीमानिदं वचनमर्थवत् ॥ १७-३-३६ (९८४२५)
तैर्विना नोत्सहे वस्तुमिह दैत्यनिबर्हण ।
गन्तुमिच्छामि तत्राहं यत्र मे भ्रातरो गताः ॥ १७-३-३७ (९८४२६)
यत्र सा बृहती श्यामा बुद्धिसत्त्वगुणान्विता ।
द्रौपदी योषितांश्रेष्ठा यत्र चैव सुता मम ॥ ॥ १७-३-३८ (९८४२७)

इति श्रीमन्महाभारते महाप्रस्थानिकपर्वणि तृतीयोऽध्यायः ॥ ३
॥ महाप्रस्थानिकं पर्व समाप्तम्॥ १७ ॥

अतः परं स्वर्गारोहणपर्वः तस्यायमाद्यः श्लोकः ।
जनमेजय उवाच ।
स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥ १ ॥
इदं महाप्रस्थानिकं पर्व कुंभघोणस्येन TI.Ar ।
कृष्णमाचार्येण TI.Ar ।
व्यासाचार्येण च मुम्बय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् ।
शकाब्दाः १८३२ सन १९१०.

१७-३-८ अस्पृश्यस्य संत्याग नृशंसं निर्दयत्वं नास्ति ॥
१७-३-१० श्ववतामशुचित्वाद्धिष्ण्यं स्थानं स्वर्गे नास्ति । क्रोधवशा नाम देवगणा अशुचेरिष्टापूर्तफलं घ्नन्ति ॥
१७-३-१८ अभिजातोसि कुलीनोसि । पितुः पाण्डोः ॥
१७-३-२६ निकाय्यस्थो निवासस्थः ॥
१७-३-२७ समुपस्थिताः स्मृतिविषयाः सन्ति ॥
१७-३-३१ यदेव भ्रातॄणां स्थानं प्राप्तुमिच्छामि ॥
३१

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org